यदा भूतपृथग्भावमेकस्थमनुपश्यति ।

तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ १३.३१ ॥

yadā bhūtapṛthagbhāvamekasthamanupaśyati |
tata eva ca vistāraṁ brahma sampadyate tadā || 13.31||

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।

शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ १३.३२ ॥

anāditvānnirguṇatvātparamātmāyamavyayaḥ |
śarīrastho'pi kaunteya na karoti na lipyate || 13.32||

यथा सर्वगतं सौक्श्म्यादाकाशं नोपलिप्यते ।

सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ १३.३३ ॥

yathā sarvagataṁ saukśmyādākāśaṁ nopalipyate |
sarvatrāvasthito dehe tathātmā nopalipyate || 13.33||

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।

क्शेत्रं क्शेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ १३.३४ ॥

yathā prakāśayatyekaḥ kṛtsnaṁ lokamimaṁ raviḥ |
kśetraṁ kśetrī tathā kṛtsnaṁ prakāśayati bhārata || 13.34||

क्शेत्रक्शेत्रज्ञयोरेवमन्तरं ज्ञानचक्शुषा ।

भूतप्रकृतिमोक्शं च ये विदुर्यान्ति ते परम् ॥ १३.३५ ॥

kśetrakśetrajñayorevamantaraṁ jñānacakśuṣā |
bhūtaprakṛtimokśaṁ ca ye viduryānti te param || 13.35||